

॥ श्रीगुरुभ्यो नमः ॥

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

## द्वितीयकाण्डे तृतीयः प्रश्नः

### इष्टिविधानं

ॐ नमः परमात्मने । श्री गुरुभ्यो नमः । हरिः ॐ

आदित्येभ्यो भुवद्वद्भ्यश्चरुन्निर्वपेद्भूतिकाम आदित्या वा एतम्भूत्यै प्रति नुदन्ते योऽलम्भूत्यै
सन् भूतिन्न प्राप्नोत्यादित्यानेव भुवद्वतः स्वेन भागधेयेनोप धावति त एवैनम्भूतिङ्गमयन्ति
भवत्येवाऽऽदित्येभ्यो धारयद्वद्भ्यश्चरुन्निर्वपेदपरुद्धो वाऽपरुध्यमानो वाऽऽदित्या वा अपरो-
द्धार आदित्या अवगमयितार आदित्यानेव धारयद्वतः ॥ [१] ॥ स्वेन भागधेयेनोप धावति
त एवैनँव्विँशि दाँद्ध्रत्यनपरुद्ध्यो भवत्यदितेऽनु मन्यस्वे त्यपरुध्यमानोऽस्य पदमा ददीते-
यँव्वा अदितिरिय मेवास्मै राज्यमनु मन्यते सत्याऽऽशीरित्याह सत्यामेवाऽऽशिषङ्कुरुत इह
मन इत्याह प्रजा एवास्मै समनसः करोत्युप प्रेत मरुतः ॥ [२] ॥ सुदानव एना विश्पति-
नाऽभ्यमुꣳ राजानमित्याह मारुती वै विड् ज्येष्ठो विश्पतिर् विशैवैनꣳ राष्ट्रेण समर्द्धयति यः
परस्ताँद् ग्राम्यवादी स्यात् तस्य गृहाद्व्रीहीना हरेच्छुक्लाꣳश्च कृष्णाꣳश्च वि चिनुयाद्ये शुक्लाः
स्युस्तमादित्यञ्चरुन्निर्वपेदादित्या वै देवतया विड् विशमेवाव गच्छ ॥ [३] ॥ त्यवगताऽस्य
विडनवगतꣳ राष्ट्रमित्याहुर् ये कृष्णाः स्युस्तँव्वारुणञ्चरुन्निर्वपेद् वारुणँव्वै राष्ट्रमुभे एव विशञ्च
राष्ट्रञ्चाव गच्छति यदि नावगच्छेदिममहमादित्येभ्यो भागन्निर्वपाम्याऽमुष्मादमुष्यै विशोऽवग-
न्तोरिति निर्वपेदादित्या एवैनम्भागधेयम्प्रेप्सन्तो विशमव ॥ [४] ॥ गमयन्ति यदि नावग-
च्छेदाश्वत्थान् मयूखाँन्थ् सप्त मद्ध्यमेषायामुप हन्यादिदमहमादित्यान् बद्ध्नाम्याऽमुष्मादमुष्यै
विशोऽवगन्तोरित्यादित्या एवैनम्बद्धवीरा विशमव गमयन्ति यदि नावगच्छेदेतमेवाऽऽदित्य-

श्चरुन्निर्वपेदिद्ध्मेऽपि मयूखान्थ् सं नह्येदनपरुद्ध्यमेवाव गच्छत्याश्वत्था भवन्ति मरुताँव्वा एत
दोजो यदश्वत्थ ओजसैव विशमव गच्छति सप्त भवन्ति सप्तगणा वै मरुतो गणश एव विशमव
गच्छति ॥ [५] ॥

(धारयद्वतो मरुतो गच्छति विशमवै त दष्टादश च) ॥ १ ॥

---

देवा वै मृत्योरबिभयुस्ते प्रजापतिमुपाधावन् तेभ्य एताम्प्राजापत्याꣳ शतकृष्णलान्निरवपत्
तयैवैष्वमृतमदधाद्यो मृत्योर्बिभीयात् तस्मा एताम्प्राजापत्याꣳ शतकृष्णलान्निर्वपेत् प्रजाप-
तिमेव स्वेन भागधेयेनोप धावति स एवास्मिन्नायुर् दधाति सर्वमायुरेति शतकृष्णला भवति
शतायुः पुरुषः शतेन्द्रिय आयुष्येवेन्द्रिये ॥ [६] ॥ प्रति तिष्ठति घृते भवत्यायुर्वै घृतममृतꣳ
हिरण्यमायुश्चैवास्मा अमृतञ्च समीची दधाति चत्वारिचत्वारि कृष्णलान्यव द्यति चतुरवत्त-
स्याऽऽप्त्यै तस्याऽऽप्त्या एकधा ब्रह्मण उप हरत्येकधैव यजमान आयुर् दधात्यसावादित्यो न
व्यरोचत तस्मै देवाः प्रायश्चित्तिमैच्छन् तस्मा एतꣳ सौर्यञ्चरुन्निरवपन् तेनैवास्मिन् ॥ [७] ॥
रुचमदधुर्यो ब्रह्मवर्चसकामः स्यात् तस्मा एतꣳ सौर्यञ्चरुन्निर्वपेदमुमेवाऽऽदित्यꣳ स्वेन भाग-
धेयेनोप धावति स एवास्मिन् ब्रह्मवर्चसन्दधाति ब्रह्मवर्चस्येव भवत्युभयतो रुक्मौ भवत उभ-
यत एवास्मिन् रुचन्दधाति प्रयाजेप्रयाजे कृष्णलञ्जुहोति दिग्भ्य एवास्मै ब्रह्मवर्चसमव रुन्ध
आग्नेयमष्टाकपालन्निर्वपेथ् सावित्रन्द्वादशकपालम्भूम्यै ॥ [८] ॥ चरुँय्यः कामयेत हिरण्य-
व्विन्देय हिरण्यम्मोप नमेदिति यदाग्नेयो भवत्याग्नेयँव्वै हिरण्यँय्यस्यैव हिरण्यन्तेनैवैनद् विन्दते
सावित्रो भवति सवितृप्रसूत एवैनद्विन्दते भूम्यै चरुर् भवत्यस्यामेवैनद्विन्दत उपैनꣳ हिरण्य-
न्नमति वि वा एष इन्द्रियेण वीर्येणर्ध्यते यो हिरण्यव्विन्दत एता ॥ [९] ॥ मेव निर्वपेद्धि-
रण्यव्वित्त्वा नेन्द्रियेण वीर्येण व्यृद्ध्यत एतामेव निर्वपेद्यस्य हिरण्यन्नश्येद्यदाग्नेयो भवत्याग्ने-
यँव्वै हिरण्यँय्यस्यै व हिरण्यन्तेनैवैनद्विन्दति सावित्रो भवति सवितृप्रसूत एवैनद्विन्दति भूम्यै
चरुर् भवत्यस्याँव्वा एतन्नश्यति यन्नश्यत्यस्यामेवैनद्विन्दतीन्द्र ॥ [१०] ॥ स्त्वष्टुः सोमम-
भीषहाऽपिबथ् स विष्वङ् व्यार्च्छथ् स इन्द्रियेण सोमपीथेन व्यार्ध्यत स यदूर्ध्वमुदवमीत्
ते श्यामाका अभवन्थ् स प्रजापतिमुपाधावत् तस्मा एतꣳ सौमेन्द्रꣳ श्यामाकञ्चरुन्निरवपत्

तेनैवास्मिन्निन्द्रियꣳ सोमपीथमदधाद्वि वा एष इन्द्रियेण सोमपीथेनर्ध्यते यः सोमँव्वमिति यः सोमवामी स्यात् तस्मा ॥ [११] ॥ एतꣳ सोमेन्द्रꣴ श्यामाकञ्चरुन्निर्वपेथ् सोमञ्चैवेन्द्रञ्च स्वेन भागधेयेनोप धावति तावेवास्मिन्निन्द्रियꣳ सोमपीथन्धत्तो नेन्द्रियेण सोमपीथेन व्यृद्ध्यते यथ् सौम्यो भवति सोमपीथमेवाव रुन्धे यदैन्द्रो भवतीन्द्रियँव्वै सोमपीथ इन्द्रियमेव सोमपीथमव रुन्धे श्यामाको भवत्येष वाव स सोमः ॥ [१२] ॥ साख्षादेव सोमपीथमव रुन्धेऽग्नये दात्रे पुरोडाशमष्टाकपालन्निर्वपेदिन्द्राय प्रदात्रे पुरोडाशमेकादशकपालम्पशुकामोऽग्निरेवास्मै पशून् प्रजनयति वृद्धानिन्द्रः प्र यच्छति दधि मधु घृतमापो धाना भवन्त्येतद्वै पशूनाꣳ रूपꣳ रूपेणैव पशूनव रुन्धे पञ्चगृहीतम्भवति पाङ्क्ता हि पशवो बहुरूपम्भवति बहुरूपा हि पशवः ॥ [१३] ॥ समृद्ध्यै प्राजापत्यम्भवति प्राजापत्या वै पशवः प्रजापतिरेवास्मै पशून् प्र जनयत्यात्मा वै पुरुषस्य मधु यन्मद्ध्वग्नौ जुहोत्यात्मानमेव तद्यजमानोऽग्नौ प्र दधाति पङ्क्त्यौ याज्यानुवाक्ये भवतः पाङ्क्तः पुरुषः पाङ्क्ताः पशव आत्मानमेव मृत्योर्निष्क्रीय पशूनव रुन्धे ॥ [१४] ॥

(इन्द्रियेऽस्मिन् भूम्या एता मिन्द्रः स्यात् तस्मै सोमो बहुरूपा हि पशव एकचत्वारिꣳशच्च) ॥ २ ॥

देवा वै सत्रमासतर्धिपरिमितँय्यशस्कामास्तेषाꣳ सोमꣳ राजानँय्यश आर्च्छथ् स गिरिमुदैत् तमग्निरनूदैत् तावग्नीषोमौ समभवतान्ताविन्द्रो यज्ञविभ्रष्टोऽनु परैत् तावब्रवीद्याजयतम्मेति तस्मा एतामिष्टिन्निरवपतामाग्नेयमष्टाकपालमैन्द्र मेकादशकपालꣳ सौम्यञ्चरुन्तयैवास्मिन् तेज ॥ [१५] ॥ इन्द्रियम्ब्रह्मवर्चसमधत्ताँय्यो यज्ञविभ्रष्टः स्यात् तस्मा एतामिष्टिन्निर्वपेदाग्नेय मष्टाकपालमैन्द्रमेकादशकपालꣳ सौम्यञ्चरुँय्यदाग्नेयो भवति तेज एवास्मिन् तेन दधाति यदैन्द्रो भवतीन्द्रियमेवास्मिन् तेन दधाति यथ् सौम्यो ब्रह्मवर्चसन्तेनाऽऽग्नेयस्य च सौम्यस्य चैन्द्रे समाश्लेषयेत् तेजश्चैवास्मिन् ब्रह्मवर्चसञ्च समीची ॥ [१६] ॥ दधात्यग्नीषोमीयमेकादशकपालन्निर्वपेद्यङ्कामो नोपनमेदाग्नेयो वै ब्राह्मणः स सोमम्पिबति स्वामेव देवताꣳ स्वेन भागधेयेनोप धावति सैवैनङ्कामेन समर्द्धयत्युपैनं कामो नमत्यग्नीषोमीयमष्टाकपालन्निर्वपेद्ब्रह्मवर्चसकामोऽग्नीषोमावेव स्वेन भागधेयेनोप धावति तावेवास्मिन् ब्रह्मवर्चसन्धत्तो ब्रह्मवर्चस्येव ॥ [१७] ॥ भवति यदष्टाकपालस्तेनाऽऽग्नेयो यच्छ्यामाकस्तेन सौम्यः समृद्ध्यै

सोमाय वाजिने श्यामाकञ्चरुन्निर्वपेद्यः क्लैब्याद्बिभीयाद् रेतो हि वा एतस्माद्वाजिनमपक्रामत्यथैष क्लैब्याद्बिभाय सोममेव वाजिनꣳ स्वेन भागधेयेनोप धावति स एवास्मिन् रेतो वाजिनन्दधाति न क्लीबो भवति ब्राह्मणस्पत्यमेकादशकपालन्निर्वपेद् ग्रामकामो ॥ [१८] ॥ ब्रह्मणस्पतिमेव स्वेन भागधेयेनोप धावति स एवास्मै सजातान् प्र यच्छति ग्राम्येव भवति गणवती याज्यानुवाक्ये भवतः सजातैरेवैनङ्गणवन्तङ्करोत्येतामेव निर्वपेद्यः कामयेत ब्रह्मन् विशँव्विँनाशयेयमिति मारुती याज्यानुवाक्ये कुर्याद् ब्रह्मन्नेव विशँव्वि नाशयति ॥ [१९] ॥

(तेजः समीची ब्रह्मवर्चस्येव ग्रामकाम स्त्रिचत्वारिꣳशच्च) ॥ ३ ॥

अर्यम्णे चरुन्निर्वपेथ् सुवर्गकामोऽसौ वा आदित्योऽर्यमाऽर्यमणमेव स्वेन भागधेयेनोप धावति स एवैनꣳ सुवर्गँल्लोकङ्गमयत्यर्यम्णे चरुन्निर्वपेद्यः कामयेत दानकामा मे प्रजाः स्युरित्यसौ वा आदित्योऽर्यमा यः खलु वै ददाति सोऽर्यमाऽर्यमणमेव स्वेन भागधेयेनोप धावति स एवा ॥ [२०] ॥ स्मै दानकामाः प्रजाः करोति दानकामा अस्मै प्रजा भवन्त्यर्यम्णे चरुन्निर्वपेद्यः कामयेत स्वस्ति जनतामियामित्यसौ वा आदित्योऽर्यमाऽर्यमणमेव स्वेन भागधेयेनोप धावति स एवैनन्तद्गमयति यत्र जिगमिषतीन्द्रो वै देवानामानुजावर आसीथ् स प्रजापतिमुपाधावत् तस्मा एतमैन्द्रमानुषूकमेकादशकपालन्नि ॥ [२१] ॥ रवपत् तेनैवैनमग्रन्देवतानाम्पर्यणयद् बुद्ध्नवती अग्रवती याज्यानुवाक्ये अकरोद् बुद्ध्नादेवैनमग्रम्पर्यणयद्यो राजन्य आनुजावरः स्यात् तस्मा एतमैन्द्रमानुषूकमेकादशकपालन्निर्वपेदिन्द्रमेव स्वेन भागधेयेनोप धावति स एवैनमग्रꣳ समानानाम्परि णयति बुद्ध्नवती अग्रवती याज्यानुवाक्ये भवतो बुद्ध्नादेवैनमग्रं ॥ [२२] ॥ परि णयत्यानुषूको भवत्येषा ह्येतस्य देवता य आनुजावरः समृद्ध्यै यो ब्राह्मण आनुजावरः स्यात् तस्मा एतम्बार्हस्पत्यमानुषूकञ्चरुन्निर्वपेद् बृहस्पतिमेव स्वेन भागधेयेनोप धावति स एवैनमग्रꣳ समानानाम्परि णयति बुद्ध्नवती अग्रवती याज्यानुवाक्ये भवतो बुद्ध्नादेवैनमग्रम्परि णयत्यानुषूको भवत्येषा ह्येतस्य देवता य आनुजावरः समृद्ध्यै ॥ [२३] ॥

(एव निर ग्रं मेतस्य चत्वारि च) ॥ ४ ॥

प्रजापतेस्त्रयस्त्रिꣳशद् दुहितर आसन् ताः सोमाय राज्ञेऽददात् तासाꣳ रोहिणीमुपैत् ता ईर्ष्यन्तीः पुनरगच्छन् ता अन्वैत् ताः पुनरयाचत ता अस्मै न पुनरददात् सोऽब्रवीद् ऋतममीष्व यथा समावच्छ उपैष्याम्यथ ते पुनर् दास्यामीति स ऋतमामीत् ता अस्मै पुनरददात् तासाꣳ रोहिणीमेवोपैत् ॥ [२४] ॥ तँय्यक्ष्म आर्च्छद्राजानँय्यक्ष्म आरदिति तद्राजयक्ष्मस्य जन्म यत् पापीयानभवत् तत् पापयक्ष्मस्य यज्जायाभ्योऽविन्दत् तज्जायेन्यस्य य एवमेतेषाँय्यक्ष्मा-णाञ्जन्म वेद नैनमेते यक्ष्मा विन्दन्ति स एता एव नमस्यन्नुपाधावत् ता अब्रुवन् वरँवृणामहै समावच्छ एव न उपाय इति तस्मा एत ॥ [२५] ॥ मादित्यञ्चरुन्निरवपन् तेनैवैनम्पापाथ् स्रामादमुञ्चन्यः पापयक्ष्मगृहीतः स्यात् तस्मा एतमादित्यञ्चरुन्निर्वपेदादित्यानेव स्वेन भाग-धेयेनोप धावति त एवैनम्पापाथ् स्रामान्मुञ्चन्त्यमावास्यायान्निर्वपेदमुमेवै नमाप्यायमानमन्वा प्याययति नवोनवो भवति जायमान इति पुरोनुवाक्या भवत्यायुरेवास्मिन् तया दधाति यमा-दित्या अꣳशुमाप्याययन्तीति याज्यैवैनमेतया प्याययति ॥ [२६] ॥

(एवोपै त मस्मिन् त्रयोदश च) ॥ ५ ॥

प्रजापतिर् देवेभ्योऽन्नाद्यँव्व्यादिशथ् सोऽब्रवीद्यदिमाँल्लोकानभ्यतिरिच्यातै तन्ममासदिति तदिमाँल्लोकानभ्यत्यरिच्यतेन्द्रꣳ राजानमिन्द्रमधिराजमिन्द्रꣳ स्वराजानन्ततो वै स इमा-ꣳल्लोकाꣳ स्त्रेधाऽदुहत् तत् त्रिधातोस्त्रिधातुत्वँय्यङ्कामयेतान्नादः स्यादिति तस्मा एतन्त्रिधातुन्नि-र्वपेदिन्द्राय राज्ञे पुरोडाश ॥ [२७] ॥ मेकादशकपालमिन्द्रायाधिराजायेन्द्राय स्वराज्ञेऽयँव्वा इन्द्रो राजाऽयमिन्द्रोऽधिराजोऽसाविन्द्रः स्वराडिमानेव लोकान्थ्स्वेन भागधेयेनोप धावति त एवास्मा अन्नम्प्र यच्छन्त्यन्नाद एव भवति यथा वथ्सेन प्रत्ताङ्गान्दुह एवमेवेमाँल्लोकान् प्रत्तान् काममन्नाद्यं दुह उत्तानेषु कपालेष्वधि श्रयत्ययातयामत्वाय त्रयः पुरोडाशा भवन्ति त्रय इमे लोका एषाँल्लोकानामाप्त्या उत्तर उत्तरो ज्यायान् भवत्येवमिव हीमे लोकाः समृद्ध्यै सर्वेषाम-भिगमयन्नव द्यत्यछंबट्कारँव्व्यत्यासमन्वाहानिर्दाहाय ॥ [२८] ॥

(पुरोडाशं त्रयः षड्विꣳशतिश्च) ॥ ६ ॥

देवासुराः सय्ँयत्ता आसन् तान् देवानसुरा अजयन् ते देवाः पराजिग्याना असुराणाव्ँवैश्य-मुपाऽऽयन् तेभ्य इन्द्रियव्ँवीर्यमपाक्रामत् तदिन्द्रोऽचायत् तदन्वपाक्रामत् तदवरुधन्नाशक्नोत् तदस्मादभ्यद्धोऽचरथ् स प्रजापतिमुपाधावत् तमेतया सर्वपृष्ठयाऽयाजयत् तयैवास्मिन्निन्द्रि-यव्ँवीर्यमदधाद्य इन्द्रियकामो ॥ [२९] ॥ वीर्यकामः स्यात् तमेतया सर्वपृष्ठया याजयेदेता एव देवताः स्वेन भागधेयेनोप धावति ता एवास्मिन्निन्द्रियव्ँवीर्यन्दधतियदिन्द्राय राथन्तराय निर्व-पति यदेवाग्नेस्तेजस्तदेवाव रुन्धे यदिन्द्राय बार्हताय यदेवेन्द्रस्य तेजस्तदेवाव रुन्धे यदिन्द्राय वैरूपाय यदेव सवितुस्तेजस्त ॥ [३०] ॥ देवाव रुन्धे यदिन्द्राय वैराजाय यदेव धातुस्तेज-स्तदेवाव रुन्धे यदिन्द्राय शाक्वराय यदेव मरुतान्तेजस्तदेवाव रुन्धे यदिन्द्राय रैवताय यदेव बृहस्पतेस्तेजस्तदेवाव रुन्ध एतावन्ति वै तेजाꣳसि तान्येवाव रुन्ध उत्तानेषु कपालेष्वधि श्रय-त्ययातयामत्वाय द्वादशकपालः पुरोडाशो ॥ [३१] ॥ भवति वैश्वदेवत्वाय समन्तम्पर्यवद्यति समन्तमेवेन्द्रियव्ँवीर्यय्ँयजमाने दधाति व्यत्यास मन्वाहानिर्दाहायाश्व ऋषभो वृष्णिर् बस्तः सा दक्षिणा वृषत्वायैतयैव यजेताभिशस्यमान एताश्चेद्वा अस्य देवता अन्नमदन्त्यदन्त्यु वेवास्य मनुष्याः ॥ [३२] ॥

(इन्द्रियकामः सवितुस्तेजस्तत् पुरोडाशो ऽष्टात्रिंꣳशच्च) ॥ ७ ॥

रजनो वै कौणेयः क्रतुजितञ्जानकिञ्चक्षुर्वन्यमयात् तस्मा एतामिष्टिन्निरवपदग्नये भ्राजस्वते पुरोडाशमष्टाकपालꣳ सौर्यञ्चरुमग्नये भ्राजस्वते पुरोडाशमष्टाकपालन्तयैवास्मिन् चक्षुरदधा-द्यश्चक्षुष्कामः स्यात् तस्मा एतामिष्टिन्निर्वपेदग्नये भ्राजस्वते पुरोडाशमष्टाकपालꣳ सौर्यञ्चरुम-ग्नये भ्राजस्वते पुरोडाशमष्टाकपालमग्नेर् वै चक्षुषा मनुष्या वि ॥ [३३] ॥ पश्यन्ति सूर्यस्य देवा अग्निञ्चैव सूर्यञ्च स्वेन भागधेयेनोप धावति तावेवास्मिन् चक्षुर्द्धत्तश्चक्षुष्मानेव भवति यदाग्नेयौ भवतश्चक्षुषी एवास्मिन् तत् प्रति दधाति यथ् सौर्यो नासिकान्तेनाभितः सौर्यमाग्नेयौ भवतस्तस्मादभितो नासिकाञ्चक्षुषी तस्मान्ना सिकया चक्षुषी विधृते समानी याज्यानुवाक्ये भवतः समानꣳ हि चक्षुः समृद्ध्या उदुत्यं जातवेदसꣳ सप्त त्वा हरितो रथे चित्रन्देवानामुद-गादनीकमिति पिण्डान् प्र यच्छति चक्षुरेवास्मै प्र यच्छति यदेव तस्य तत् ॥ [३४] ॥

(वि ह्य ष्टाविꣳशतिश्च) ॥ ८ ॥

ध्रुवोऽसि ध्रुवोऽहꣳ सजातेषु भूयासन्धीरश्चेत्ता वसुविद् ध्रुवोऽसि ध्रुवोऽहꣳ सजातेषु भूयासमुग्रश्चेत्ता वसुविद् ध्रुवोऽसि ध्रुवोऽहꣳ सजातेषु भूयासमभिभूश्चेत्ता वसुविदामनमस्यामनस्य देवा ये सजाताः कुमाराः समनसस्तानहङ्कामये हृदा ते माङ्कामयन्ताꣳ हृदा तान् म आमनसः कृधि स्वाहाऽऽमनमस्या ॥ [३५] ॥ मनस्य देवा याः स्त्रियः समनसस्ता अहङ्कामये हृदा ता माङ्कामयन्ताꣳ हृदा ता म आमनसः कृधि स्वाहा वैश्वदेवीꣳ साङ्ग्रहणीन्निर्वपेद् ग्रामकामो वैश्वदेवा वै सजाता विश्वानेव देवान्थ् स्वेन भागधेयेनोप धावति त एवास्मै सजातान् प्र यच्छन्ति ग्राम्येव भवति साङ्ग्रहणी भवति मनोग्रहणव्वै सङ्ग्रहणम्मन एव सजातानां ॥ [३६] ॥ गृह्णाति ध्रुवोऽसि ध्रुवोऽहꣳ सजातेषु भूयासमिति परिधीन् परि दधात्याशिषमेवैतामा शास्तेऽथो एतदेव सर्वꣳ सजातेष्वधि भवति यस्यैवव्विदुष एते परिधयः परिधीयन्त आमनमस्यामनस्य देवा इति तिस्र आहुतीर् जुहोत्येतावन्तो वै सजाता ये महान्तो ये क्षुल्लका याः स्त्रियस्तानेवाव रुन्धे त एनमवरुद्धा उप तिष्ठन्ते ॥ [३७] ॥

(स्वाहाऽऽमनमसिसजातानाꣳ रुन्धेपञ्च च) ॥ ९ ॥

यन्नवमैत् तन्नवनीतमभवद्यदसर्पत् तथ् सर्पिरभवद्यदद्ध्रियत तद् घृतमभवदश्विनोः प्राणोऽसि तस्य ते दत्तांय्ययोः प्राणोऽसि स्वाहेन्द्रस्य प्राणोऽसि तस्य ते ददातु यस्य प्राणोऽसि स्वाहा मित्रावरुणयोः प्राणोऽसि तस्य ते दत्तांय्ययोः प्राणोऽसि स्वाहा विश्वेषान्देवानाम्प्राणोऽसि ॥ [३८] ॥ तस्य ते ददतु येषाम्प्राणोऽसि स्वाहा घृतस्य धाराममृतस्य पन्थामिन्द्रेण दत्ताम्प्रयताम्मरुद्भिः। तत् त्वा विष्णुः पर्यपश्यत् तत् त्वेडा गव्यैरयत्॥ पावमानेन त्वा स्तोमेन गायत्रस्य वर्तन्योपाꣳशोर् वीर्येण देवस्त्वा सवितोथ् सृजतु जीवातवे जीवनस्यायै बृहद्रथन्तरयोस्त्वा स्तोमेन त्रिष्टुभो वर्तन्या शुक्रस्य वीर्येण देवस्त्वा सवितोथ् ॥ [३९] ॥ सृजतु जीवातवे जीवनस्याया अग्नेस्त्वा मात्रया जगत्यै वर्तन्याऽऽग्रयणस्य वीर्येण देवस्त्वा

सवितोथ् सृजतु जीवातवे जीवनस्यायां इममग्न आयुषे वर्चसे कृधि प्रियꣳ रेतो वरुण सोम राजन्न्। मातेवास्मा अदिते शर्म यच्छ विश्वे देवा जरदष्टिर्यथाऽसत्॥ अग्निरायुष्मान्थ् स वनस्पतिभिरायुष्मान् तेन त्वाऽऽयुषाऽऽयुष्मन्तङ्करोमि सोम आयुष्मान्थ् स ओषधीभिर् यज्ञ आयुष्मान्थ् स दक्षिणाभिर् ब्रह्माऽऽयुष्मत् तद्ब्राह्मणैरायुष्मद् देवा आयुष्मन्तस्तेऽमृतेन पितर आयुष्मन्तस्ते स्वधयाऽऽयुष्मन्तस्तेन त्वाऽऽयुषाऽऽयुष्मन्तङ्करोमि ॥ [४०] ॥

(आयुष्मान् पञ्चविꣳशतिश्च) ॥ १० ॥

अग्निंवा एतस्य शरीरङ्गच्छति सोमꣳ रसो वरुण एनंवरुणपाशेन गृह्णाति सरस्वतींवा-ग्नाविष्णू आत्मा यस्य ज्योगामयति यो ज्योगामयावी स्याद्यो वा कामयेत सर्वमायुरिया-मिति तस्मा एतामिष्टिन्निर्वपेदाग्नेय मष्टाकपालꣳ सौम्यञ्चरुंवारुणन्दशकपालꣳ सारस्वतञ्चरु-माग्नावैष्णव मेकादशकपाल मग्नेरेवास्य शरीरन्निष्क्रीणाति सोमाद्रस ॥ [४१] ॥ वारुणेनै-वैनंवरुणपाशान् मुञ्चति सारस्वतेन वाचन्दधात्यग्निः सर्वा देवता विष्णुर् यज्ञो देवताभिश्चै-वैनंयज्ञेन च भिषज्यत्युत यदीतासुर् भवति जीवत्येव यन्नवमैत् तन्नवनीतमभवदित्याज्यम-वेक्षते रूपमेवास्यै तन्महिमानंव्याचष्टेऽश्विनोः प्राणोऽसीत्याहाश्विनौ वै देवानां ॥ [४२] ॥ भिषजौ ताभ्यामेवास्मै भेषजङ्करोतीन्द्रस्य प्राणोऽसीत्याहेन्द्रियमेवास्मिन्नेतेन दधाति मित्रावरु-णयोः प्राणोऽसीत्याह प्राणा पानावेवास्मिन्नेतेन दधाति विश्वेषान्देवानां प्राणोऽसीत्याह वीर्यमे-वास्मिन्नेतेन दधाति घृतस्य धाराममृतस्य पन्थामित्याह यथायजु रेवैतत् पावमानेन त्वा स्तोमे-नेत्या ॥ [४३] ॥ ह प्राणमेवास्मिन्नेतेन दधाति बृहद्रथन्तरयोस्त्वा स्तोमेनेत्याहौज एवास्मि-न्नेतेन दधात्यग्नेस्त्वा मात्रयेत्याहाऽऽत्मानमेवास्मिन्नेतेन दधात्यृत्विजः पर्याहुर्यावन्त एवर्त्वि-जस्त एनम्भिषज्यन्ति ब्रह्मणो हस्तमन्वारभ्य पर्याहुरेकधैव यजमान आयुर् दधति यदेव तस्य तद्धिरण्याद् ॥ [४४] ॥ घृतन्निष्पिबत्यायुर् वै घृतममृतꣳ हिरण्यममृतादेवाऽऽयुर् निष्पिबति शतमानम्भवति शतायुः पुरुषः शतेन्द्रिय आयुष्येवेन्द्रिये प्रति तिष्ठत्यथो खलु यावतीः समा एष्यन् मन्येत तावन्मानङ्स्याथ् समृद्ध्या इममग्न आयुषे वर्चसे कृधीत्याहाऽऽयुरेवास्मिन् वर्चो

दधाति विश्वे देवा जरदष्टिर् यथाऽसदित्या ह जरदष्टिमेवैनङ्करोत्यग्निरायुष्मानिति हस्तङ्गृह्णात्येते वै देवा आयुष्मन्तस्त एवास्मिन्नायुर् दधति सर्वमायुरेति ॥ [४५] ॥

(रसं देवानाꣳ स्तोमेनेति हिरण्या दसदिति द्वाविꣳशतिश्च) ॥ ११ ॥

---

प्रजापतिर् वरुणायाश्वमनयथ् स स्वान्देवतामार्च्छथ् स पर्यदीर्यत स एतव्ँवारुणं चतुष्कपालमपश्यत् तन्निरवपत् ततो वै स वरुणपाशादमुच्यत वरुणो वा एतङ्गृह्णाति योऽश्वम्प्रतिगृह्णाति यावतोऽश्वान् प्रतिगृह्णीयात् तावतो वारुणान् चतुष्कपालान् निर्वपेद्वरुणमेव स्वेन भागधेयेनोप धावति स एवैनव्ँवरुणपाशान् मुञ्चति ॥ [४६] ॥ चतुष्कपाला भवन्ति चतुष्पाद्ध्यश्वः समृद्ध्या एकमतिरिक्तन्निर्वपेद्यमेव प्रतिग्राही भवति यव्ँवा नाद्ध्येति तस्मादेव वरुणपाशान् मुच्यते यद्यपरम्प्रतिग्राही स्याथ् सौर्यमेककपालमनु निर्वपेदमुमेवाऽऽदित्यमुच्चारङ्कुरुतेऽपोऽवभृथमवैत्यप्सु वै वरुणः साख्षादेव वरुणमव यजतेऽपोनप्त्रीयञ्चरुम्पुनरेत्य निर्वपेदप्सु योनिर् वा अश्वः स्वामेवैनय्ँयोनिङ्गमयति स एनꣳ शान्त उप तिष्ठते ॥ [४७] ॥

(मुञ्चति चरुꣳ सप्तदश च) ॥ १२ ॥

---

या वामिन्द्रावरुणा यतव्या तनूस्तयेममꣳहसो मुञ्चतय्ँया वामिन्द्रावरुणा सहस्या रख्षस्या तेजस्या तनूस्तयेममꣳहसो मुञ्चतय्ँयो वामिन्द्रावरुणावग्नौ स्रामस्तव्ँवामेतेनाव यजे यो वामिन्द्रावरुणा द्विपाथ्सु पशुषु चतुष्पाथ्सु गोष्ठे गृहेष्वप्स्वोषधीषु वनस्पतिषु स्रामस्तव्ँवामेतेनाव यज इन्द्रो वा एतस्य ॥ [४८] ॥ न्द्रियेणाप क्रामति वरुण एनव्ँवरुणपाशेन गृह्णाति यः पाप्मना गृहीतो भवति यः पाप्मना गृहीतः स्यात् तस्मा एतामैन्द्रावरुणीम्पयस्यान्निर्वपेदिन्द्र एवास्मिन्निन्द्रियन्दधाति वरुण एनव्ँवरुणपाशान् मुञ्चति पयस्या भवति पयो हि वा एतस्मादपक्रामत्यथैष पाप्मना गृहीतो यत् पयस्या भवति पय एवास्मिन् तया दधाति पयस्यायां ॥ [४९] ॥ पुरोडाशमव दधात्यात्मन्वन्तमेवैनङ्करोत्यथो आयतनवन्तमेव चतुर्द्धा व्यूहति

दिक्ष्वेव प्रति तिष्ठति पुनः समूहति दिग्भ्य एवास्मै भेषजङ्करोति समूह्याव द्यति यथाऽऽवि-
द्धन्निष्कृन्तति तादृगेव तद्यो वामिन्द्रावरुणावग्नौ स्रामस्तव्वामेतेनाव यज इत्याह दुरिष्ट्या एवै-
नम्पाति यो वामिन्द्रावरुणा द्विपात्सु पशुषु स्रामस्तव्वामेतेनाव यज इत्याहैतावतीर् वा आप
ओषधयो वनस्पतयः प्रजाः पशव उपजीवनीयास्ता एवास्मै वरुणपाशान् मुञ्चति ॥ [५०] ॥
(एतस्य पयस्यायां पाति षड्विꣳशतिश्च) ॥ १३ ॥

स प्रत्नव >१, न्निकाव्ये >२, न्द्रँव्वो विश्वतस्परी >३, न्द्रन्नरः >४॥ त्वन्नः सोम विश्वतो रक्षा
राजन्नघायतः। न रिष्येत् त्वावतः सखा॥ या ते धामानि दिवि या पृथिव्यायँया पर्वतेष्वोषधी-
ष्वप्सु॥ तेभिर् नो विश्वैः सुमना अहेडन् राजन्त्सोम प्रति हव्या गृभाय॥ अग्नीषोमा सवेदसा
सहूती वनतङ्गिरः। सन्देवत्रा बभूवथुः॥ युव ॥ [५१] ॥ मेतानि दिवि रोचनान्यग्निश्च सोम
सक्रतू अधत्तम्॥ युवꣳ सिन्धूꣳरभिशस्तेरवद्यादग्नीषोमावमुञ्चतङ्गृभीतान्॥ अग्नीषोमाविमꣳ
सु मे शृणुतव्वृषणा हवम्। प्रति सूक्तानि हर्यतम्भवतन्दाशुषे मयः॥ आऽन्यन्दिवो मातरिश्वा
जभाराऽमथ्नादन्यम्परि श्येनो अद्रेः। अग्नीषोमा ब्रह्मणा वावृधानोरुँय्यज्ञाय चक्रथुरु लोकम्॥
अग्नीषोमा हविषः प्रस्थितस्य वीतꣳ ॥ [५२] ॥ हर्यतव्वृषणा जुषेथाम्॥ सुशर्माणा स्ववसा
हि भूतमथा धत्तँय्यजमानाय शँय्योः॥ आ प्यायस्व >५, सन्ते >६॥ गणानान्त्वा गणपतिꣳ
हवामहे कविङ्कवीनामुपमश्रवस्तमम्। ज्येष्ठराजम्ब्रह्मणाम्ब्रह्मणस्पत आ नः शृण्वन्नूतिभिः सीद
सादनम्। स इज्जनेन स विशा स जन्मना स पुत्रैर् वाजम्भरते धना नृभिः॥ देवानाँय्यः पित-
रमाविवासति ॥ [५३] ॥ श्रद्धामना हविषा ब्रह्मणस्पतिम्॥ स सुष्टुभा स ऋक्वता गणेन
वलꣳ रुरोज फलिगꣳ रवेण। बृहस्पतिरुस्रिया हव्यसूदः कनिक्रदद्वावशतीरुदाजत्॥ मरुतो
यद्ध वो दिवो>७, या वः शर्म >८॥ अर्यमाऽऽयाति वृषभस्तुविष्मान् दाता वसूनाम्पुरुहूतो
अर्हन्। सहस्राक्षो गोत्रभिद्वज्रबाहुरस्मासु देवो द्रविणन्दधातु॥ ये तेऽर्यमन् बहवो देवयानाः
पन्थानो ॥ [५४] ॥ राजन् दिव आचरन्ति। तेभिर् नो देव महि शर्म यच्छ शन्न एधि द्विपदे
शञ्चतुष्पदे॥ बुद्ध्नादग्रमङ्गिरोभिर् गृणानो वि पर्वतस्य दृꣳहितान्यैरत्। रुजद्रोधाꣳसि कृत्रिमा-
ण्येषाꣳ सोमस्य ता मद इन्द्रश्चकार॥ बुद्ध्नादग्रेण वि मिमाय मानैर् वज्रेण खान्यतृणन्नदीनाम्।

वृथाऽसृजत् पथिभिर् दीर्घयाथैः सोमस्य ता मद इन्द्रश्चकार ॥ [५५] ॥ प्र यो जज्ञे विद्वाँ
अस्य बन्धुँर्विश्वानि देवो जनिमा विवक्ति। ब्रह्म ब्रह्मण उज्जभार मद्ध्यान्नीचादुच्चा स्वधयाऽभि
प्र तस्थौ॥ महान् मही अस्तभायद्वि जातो द्याँ सद्म पार्थिवञ्च रजः। स बुद्ध्नादाष्ट जनु-
षाऽभ्यग्रम्बृहस्पतिर् देवता यस्य सम्राट्॥ बुद्ध्नाद्यो अग्रमभ्यत्योजसा बृहस्पतिमा विवासन्ति
देवाः। भिनद्वलँव्वि पुरो दर्दरीति कनिक्रदथ् सुवरपो जिगाय ॥ [५६] ॥

(युवं वीतमा विवासति पन्थानो दीर्घयाथैः सोमस्य ता मद इन्द्रश्चकारदेवानव च) ॥ १४ ॥

## समाप्ति कोर्वैः

(आदित्येभ्योदेवा वै मृत्योर्देवा वै सत्र मर्यणेप्रजापतेस्त्रयस्त्रिंशत् प्रजापतिर् देवेभ्योऽन्नाद्यंदेवासुरास्तात्रजनो ध्रुवोऽसि यन्नवं मग्निर्व्वै प्रजापतिर्वरुणाय या वामिन्द्रा वरुणा स प्रत्नव चतुर्दश)
(आदित्येभ्य स्त्वष्टु रस्मै दानकामा एवावं रुन्धे ऽग्निर्व्वै स प्रत्नवथ् षट्श्चाशत्)
(आदित्येभ्यः सुवरपो जिगाय)

॥ हरिः ॐ ॥

द्वितीयकाण्डे तृतीयः प्रश्नः समाप्तः

| अनुवाकाः | पञ्चशत्यः |
|---|---|
| १४ | ५६ |

ॐ